श्री गणेशाय नमः ।
श्री गुरुभ्यो नमः ।
श्री शारदाम्बिकायै नमः ।

# ॥ श्यामला दण्डकम् ॥

(By MAHAKAVI KALIDASA)

हरिः ॐ

॥ ध्यानम् ॥

माणिक्य वीणामुपलालयन्तीं
मदालसां मञ्जुल वाग्विलासाम् ।
माहेन्द्र नीलद्युति कोमलाङ्गीं
मातङ्ग कन्यां मनसा स्मरामि ॥ 1॥



चतुर्भुजे चन्द्रकलावतंसे
कुचोन्नते कुङ्कुम रागशोणे ।
पुण्ड्रेक्षु पाशाङ्कुश पुष्पबाण-
हस्ते नमस्ते जगदेकमातः ॥ 2॥

माता मरकतश्यामा मातङ्गी मदशालिनी ।
कुर्यात् कटाक्षं(कटाक्षयतु) कल्याणी कदम्ब वनवासिनी ॥ 3॥

जय मातङ्गतनये जय नीलोत्पलद्युते ।
जय सङ्गीतरसिके जय लीलाशुकप्रिये ॥ 4॥

॥ दण्डकम् ॥

जय जननि सुधासमुद्रान्त हृद्यन्मणिद्वीप–
संरूढ बिल्वाटवीमध्य कल्पद्रुमाकल्प
कादम्ब कान्तार वासप्रिये, कृत्तिवासप्रिये, सर्वलोकप्रिये ।

सादरारम्भ सङ्गीत सम्भावना सम्भ्रमालोल–
नीपस्रगाबद्ध चूलीसनाथत्रिके सानुमत्पुत्रिके ।

शेखरीभूत शीतांशुरेखा मयूखावलीबद्ध (मयूखावलीनद्ध)–
सुस्निग्ध नीलालकश्रेणि शृङ्गारिते लोकसम्भाविते ।

कामलीलाधनुस्सन्निभ भ्रूलतापुष्प सन्दोह–सन्देहकृल्लोचने, वाक्सुधासेचने ।
चारुगोरोचनापङ्क केलीललामाभिरामे, सुरामे, रमे ।

प्रोल्लसद्वालिका मौक्तिकश्रेणिका चन्द्रिकामण्डलोद्भासि
लावण्य गण्डस्थल न्यस्त कस्तूरिकापत्ररेखा समुद्भूत सौरभ्य–
सम्भ्रान्त भृङ्गाँगनागीत सान्द्री भवन्मन्द्र तन्त्रीस्वरे सुस्वरे भास्वरे ।

वल्लकीवादन प्रक्रियालोल तालीदळाबद्ध–

ताटङ्कभूषा विशेषान्विते, सिद्धसम्मानिते ।

दिव्यहाला मदोद्वेल हेलालस चक्षुरान्दोलनश्री समाक्षिप्त कर्णैक नीलोत्पले, श्यामले ।
पूरिताशेष लोकाभि वाञ्छाफले, निर्मले, श्रीफले ।

स्वेदबिन्दूल्लसत्फाल लावण्य निष्यन्द–
सन्दोह–सन्देहकृन्नासिकामौक्तिके, सर्वमन्त्रात्मिके, कालिके ।
मुग्द्ध मन्दस्मितोदार वक्त्र स्फुरत् पूग कर्पूर ताम्बूल खण्डोत्करे,
ज्ञानमुद्राकरे, सर्वसंपत्करे, पद्मभास्वत्करे श्रीकरे ।

कुन्दपुष्पद्युति स्निग्ध दन्तावली निर्मलालोल कल्लोल सम्मेलन
स्मेर शोणाधरे, चारुवीणाधरे, पक्वबिम्बाधरे ।

सुललित नवयौवनारम्भ चन्द्रोदयोद्वेल लावण्य दुग्धार्णवाविर्भवत्कम्बु
बिम्बोक हृत्कन्धरे, सत्कलामन्दिरे, मन्थरे ।

दिव्य रत्न प्रभा बन्धुरच्छन्न हारादिभूषा –
समुद्योतमानानवद्याङ्ग शोभे, शुभे ।

रत्नकेयूर रश्मिच्छटा पल्लव प्रोल्लसत् दोर्लता राजिते, योगिभिः पूजिते ।

विश्वदिक्मण्डलव्यापि माणिक्यतेजः

स्फुरत्कङ्कणालंकृते, विभ्रमालंकृते, साधकै सत्कृते ।(साधुभिः पूजिते )
वासरारम्भवेला समुज्जृम्भमाणारविन्द प्रतिद्वन्द्विपाणिद्वये, सन्ततोद्यद्दये अद्वये ।

दिव्यरत्नोर्मिका दीधितिस्तोम सन्ध्यायमानाङ्गुली पल्लवोद्यन्नखेन्दु प्रभामण्डले,
सन्नताखण्डले, चित्प्रभामण्डले, प्रोल्लसत्कुण्डले ।

तारकाराजि नीकाश हारावलिस्मेर चारुस्तनाभोग भारानमन्मध्यवल्ली–
वलिच्छेद वीचीसमुद्यत्समुल्लास सन्दर्शिताकार सौन्दर्यरत्नाकरे,
वल्लकीभृत्करे, किङ्करश्रीकरे ।
हेमकुम्भोपमोत्तुङ्ग वक्षोजभारावनम्रे, त्रिलोकावनम्रे ।
लसद्वृत्त गम्भीर नाभीसरस्तीर शैवाल शङ्काकर श्यामरोमावली भूषणे, मञ्जुसम्भाषणे ।

चारुशिञ्चत्कटीसूत्र निर्भत्सितानङ्ग लीलधनु–शिञ्चिनीडम्बरे दिव्यरत्नाम्बरे ।

पद्मरागोल्लसत्मेखला भास्वर–श्रोणिशोभाजित स्वर्णभूभृत्तले, चन्द्रिकाशीतले ।

विकसित–नवकिंशुकाताम्र दिव्यांशुकच्छन्न चारूरुशोभा–पराभूत
सिन्दूर शोणाय मानेन्द्र मातङ्ग हस्तार्गले, वैभवानर्गले, श्यामले ।

कोमलस्निग्ध नीलोत्पलोत्पादितानङ्गतूणीर शङ्काकरोदारजंघालते, चारुलीलागते ।

नम्रदिक्पाल सीमन्तिनी कुन्तल–स्निग्धनील प्रभापुञ्च सञ्जात दुर्वाङ्कुराशङ्क
सारंग–संयोगरिंखन्नखेन्दूज्ज्वले, प्रोज्वले, निर्मले ।

प्रह्व देवेश (लक्ष्मीश) भूतेश तोयेश वाणीश कीनाश
दैत्येश यक्षेश वाय्वग्नि कोटीर माणिक्य संघुष्ट–बालातपोद्दाम–
लाक्षारसारुण्य–तारुण्य लक्ष्मीगृहिताङ्घ्रिपद्मे, सुपद्मे, उमे ।

सुरुचिर नवरत्न पीठस्थिते, सुस्थिते ।

रत्नपद्मासने रत्नसिम्हासने शङ्खपद्म द्वयोपाश्रिते, (विश्रुते) ।
तत्र विघ्नेश दुर्गा वटु क्षेत्रपालैर्युते ।

मत्तमातङ्ग कन्यासमूहान्विते । मञ्जुला मेनकाद्यङ्गना मानिते, भैरवैरष्टभिर्वेष्टिते ।
देवि वामादिभिः शक्तिभिस्सेविते (संश्रिते) ।
धात्रि लक्ष्म्यादि शक्त्यष्टकैः संयुते ।
मातृकामण्डलैः मण्डिते ।
यक्षगन्धर्व सिद्धाङ्गना मण्डलैः अर्चिते ।

पञ्चबाणात्मिके । पञ्चबाणेन रत्या च सम्भाविते ।
प्रीतिभाजा वसन्तेन चानन्दिते ।

भक्तिभाजां परं श्रेयसे कल्पसे ।
योगिनां मानसे द्योतसे ।
छन्दसामोजसा भ्राजसे ।
गीतविद्या विनोदाति तृष्णेन कृष्णेन संपूज्यसे ।

भक्तिमच्चेतसा वेधसा स्तूयसे ।
विश्वहृद्येन वाद्येन विद्याधरैर्गीयसे ।

श्रवणहरण दक्षिणक्वाणया वीणया किन्नरैर्गीयसे ।
यक्षगन्धर्वसिद्धाङ्गना मण्डलैः अर्च्यसे ।

सर्वसौभाग्यवाञ्छावतीभिः वधूभिस्सुराणां समाराध्यसे ।
सर्व विद्या विशेषात्मकं चाटुगाथा समुच्चारणं कण्ठमूलोल्लसद्–
वर्ण राजित्रयं कोमलश्यामलोदारपक्षद्वयं
तुण्डशोभातिदूरीभवत् किंशुकं तं शुकं लालयन्ती परिक्रीडसे ।

पाणिपद्मद्वयेनाक्षमालामपि स्फाटिकीं ज्ञानसारात्मकं
पुस्तकं चाङ्कुशं पाशमाबिभ्रती येन सञ्चिन्त्यसे तस्य वक्त्रान्तरात्
गद्य पद्यात्मिका भारती निस्सरेत् ।
येन वा यावकाभाकृतिः भाव्यसे, तस्य वश्या भवन्ति स्त्रियः पूरुषाः ।
येन वा शातकुम्भद्युतिर्भाव्यसे सोऽपि लक्ष्मीसहस्रैः परिक्रीडसे (सोपि) ।

किं न सिद्ध्येद्वपुः श्यामलं कोमलं तावकं चन्द्रचूडान्वितं ध्यायतः ।
तस्य लीलासरोवारिधीः ।
तस्य केलीवनं(लीलावनं) नन्दनं ।
तस्य भद्रासनं भूतलं ।
तस्य गीर्देवता किङ्करि ।
तस्य चाज्ञाकरी श्री स्वयं ।

सर्वतीर्थात्मिके सर्वमन्त्रात्मिके (सर्वतन्त्रात्मिके),
सर्वयन्त्रात्मिके (सर्वचक्रात्मिके) सर्वशक्त्यात्मिके
सर्वपीठात्मिके सर्वतत्वात्मिके सर्वविद्यात्मिके
सर्वयोगात्मिके सर्वनादात्मिके सर्वशब्दात्मिके
सर्ववर्णात्मिके सर्वविश्वात्मिके (सर्वदीक्षात्मिके) सर्वसर्वात्मिके
सर्वगे हे जगन्मातृके पाहिमां पाहिमां पाहिमां
देवि तुभ्यं नमो, देवि तुभ्यं नमो, देवि तुभ्यं नमो नमः

॥ हरिः ॐ ॥